Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२०६ - घ

Title पाण्डवगीता

Author

Extent १८ Age

Subject भक्तिशास्त्रम

© Dharmartha Trust J&K. Digitized by eGangotri

4506

F = 17

नं० ४५०६-घ

पाण्डवगीता

नं० ४५०६-घ

पत्राणि १८

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४५०६-घ

पाण्डवगीता

पत्राणि १८

© Dharmartha Trust J&K. Digitized by eGangotri

।स्वामीब्रह्मानंदस्य पुस्तकस्य पत्र ७९॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशायनमः॥ पांडवाऊचुः॥ प्रह्ला
दनारदपराशरपुंडरीकंव्यासांबरी १।
षशुकशौनकभीष्मकार्ल्भ्यरुक्मांग
दार्जुनवसिष्ठविभीषणार्द्यपुण्यानि
मान्परमभागवतंनमामि॥१॥ लोमह
र्षणाउवाच॥ धर्मोविवर्द्धतियुधिष्ठिर
कीर्तनेनपापंप्रणश्यतिवृकोदरकी
र्तनेन॥ शत्रु [illegible] धनंजयकी

© Dharmartha Trust J&K. Digitized by eGangotri

र्त्तमेन मार्क्षीस्तु लोकष्यपतांन भवं
न्ति रोगाः ॥५॥ ब्रह्मोवाच ॥ येमानवा
विगतरागपरापरज्ञानारायणं
सुरगुरुं सततं स्मरन्ति । ध्यानेन
तेन हतकिल्बिषचेतनास्ते मातुः
पयोधररसं न पुनः पिबन्ति ।७॥
इन्द्रउवाच ॥ नारायणं नाम नरो न
राणां प्रसिद्धचौरः कथितः पृथि

© Dharmartha Trust J&K. Digitized by eGangotri

थां ॥ अनेकजन्मार्जितपापसंचयं ।२।
हरत्यशेषं स्मृतमात्र एव ॥४॥ युधि
2 ष्ठिर उवाच ॥ मेघश्यामं पीतकौशे
यवासं श्रीवत्सांकं कौस्तुभोद्भासि
तांगं पुण्योपेतं पुंडरीकायताक्षं वि
ष्णुं वंदे सर्वलोकैकनाथं ॥५॥
भीमसेन उवाच ॥ जलौघमग्ना
सचराचरा धरा विषाणकोट्या

© Dharmartha Trust J&K. Digitized by eGangotri

स्वेच्छाविश्वमूर्त्तिना। समुद्धृतायेनव
राहरूपिणा। समे[illegible]स्वयंभूर्भगवा
न्प्रसीदतु॥४॥ अर्जुन उवाच॥ अवि
समव्यक्तमनंतमव्ययं। विभुंप्रभुं
भावितभूतभावनं। त्रैलोक्यविस्ता
रविचारकारकं। हरिं प्रपन्नोस्मिग
तिं महात्मनां॥५॥ नकुल उवाच॥ यद
गमनमधस्तात्कालपाशानुबंधात्

© Dharmartha Trust J&K. Digitized by eGangotri

।यदि च कुलविहीने जायते पापि की
टे॥ कृमिजातमपि गत्वा जायते चांतरा ।३।
त्मा मम भवतु हरिस्तोकैकरावे मंदिरे
का॥८॥ सहदेव उवाच॥ तस्य यज्ञव
राहस्य विष्णोरमिततेजसः। प्राणामं
ये पि कुर्वंति तेषामपि नमो नमः॥९॥
कुंत्युवाच॥ स्वकर्मफलनिर्दिष्टां यां
यां योनिं व्रजाम्यहं॥ तस्यां तस्यां हरि

© Dharmartha Trust J&K. Digitized by eGangotri

3

केशौ त्वयि भक्तिर्दृढास्तु मे ॥१०॥ मार्क
वाच ॥ कुर्मेरताः कर्म मनुस्मरंति
रात्रौ च कर्म पुनः कृच्छ्रितायाः ते भिन्न
देहाः प्रविशंति कर्म संहविर्यथा मंत्र
हुतं कृताग्नौ ॥११॥ ध्रुवो वाच ॥ कीटेषु
पक्षिषु मृगेषु सरीसृपेषु रक्षः पिशा
च मनुजेष्वपि यत्र यत्र जातस्य मे भ
वतु केशव ते प्रसादात्त्वय्येव भक्तिर

© Dharmartha Trust J&K. Digitized by eGangotri

चलामभिचारिणी च ॥१२॥ समज्ञोवा
च ॥ एकोपि कृष्णस्य कृत प्रणामो दशा
श्वमेधावभृथेन तुल्यः ॥ दशाश्वमे
५ धी पुनरेपि जन्म कृष्ण प्रणामी न पु
नर्भवाय ॥१३॥ अभिमन्युवाच ॥ गोविं
द गोविंद हरे मुरारे गोविंद गोविंद
मुकुंद कृष्ण ॥ गोविंद गोविंद रथां
ग पाणे गोविंद गोविंद नमोसज्ञेथा
१४ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मृकण्डस्नुरुवाच ॥ श्रीराम नारायण वा
सुदेव गोविंद वैकुंठ मुकुंद कृष्ण ॥ श्रीके
शवानंत नृसिंह विष्णो मां त्राहि संसा
र भुजंग दष्टं ॥ १५ ॥ सखिरुवाच ॥
अप्रमेय हरे विष्णो कृष्ण दामोदराच्यु
त ॥ गोविंदानंत सर्वेश वासुदेव नमो
स्तु ते ॥ १६ ॥ उद्धव उवाच ॥ वासुदेवं
परित्यज्य योन्यदेवमुपासते ॥ तृषि
तो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ १७ ॥
© Dharmartha Trust J&K. Digitized by eGangotri

अपघमेसफलंजन्म। अपघमेसफलं
कुलं॥ अपघमेसफलोदेहो। अपघमेस ।५।
फलाक्रिया।१८॥ धौम्यउवाच। अपां
5 समीपेशापनासनेगृहेद्विवाचरात्रे
चयथाधिगच्छतां। यद्यस्तिकिंचित्स
कृतंकृतंमया। जनार्दनस्तेनकृते
नतुष्यतु॥ संजयउवाच। पार्थविषा
णाःशिथिलाश्चभीतावीरेषुव्या
धिषुवर्तमानाः। संकीर्त्यनारायण
© Dharmartha Trust J&K. Digitized by eGangotri

शब्दमात्रं विमुक्तदुःखाः सुखिनो भवं
ति ।२०। अक्रूरउवाच ॥ अहमस्मि नारा
यणदासदासदासस्य दासस्य च दा
सदासः । अन्येभ्य ईशो जगतो नराणां
तस्मादहं धन्यतरोस्मि लोके ।२१। विदु
रउवाच ॥ वासुदेवस्य ये भक्ताः शांता
स्तत्कृतमानसाः । तेषां दासस्य दासोहं
भवे जन्मनि जन्मनि ।२२। भीष्मउवाच ।

© Dharmartha Trust J&K. Digitized by eGangotri

विपरीतेषुकालेषुपतिसागेषुबंधुषु
॥त्वामिमांरूपयाक्लप्स्यंशरणागतव १८
त्सलः॥२३॥द्रोणउवाच॥येयेहताश्च
क्रधरेणदैत्यास्त्रैलोक्यनाथेनजना
र्दनेन॥तेतेगताविष्णुपुरिंनरेंद्रक्रो
धोपिदेवस्यवरेणतुल्यः॥२४॥
कृपाचार्यउवाच॥मज्जन्मफलमिदंनः
मधुकैटभारेमत्प्रार्थनीयमदनु

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रह एष एव ॥ त्व भूस भूस परचार
क भूस भूस भूसस्व भूस इति मां स्मर
लोकनाथ ॥२५॥ अथ श्यामा उवाच ॥
गोविंद केशव जनार्दन वासुदेव वि
५ श्व याविश्व मधुसूदन विश्वरूप
श्री पद्मनाभ पुरुषोत्तम पुष्करासँव्य हृ
नारायणाच्युत नृसिंह नमोनमस्ते
॥२६॥ कर्दमुवाच ॥ नान्यं वदामि न शृ
णोमि न चिंतयामि नान्यं स्मरामि न

© Dharmartha Trust J&K. Digitized by eGangotri

मनामिनचाग्रयामि ॥ मत्स्यात्वद्दीपच
रणांबुजमाहरेण श्रीश्रीनिवासपु
रुषोत्तमदेहिदास्यं ॥२७॥ धृतराष्ट्र
उवाच ॥ नमो नमःकारणवामना
यनारायणायामितविक्रमायश्री
शार्ङ्गचक्रासिगदाधरायनमोस्तु
तस्मैपुरुषोत्तमाय ॥२८॥ गांधार्युवा
च ॥ त्वमेवमाताचपितात्वमेवत्वमे

© Dharmartha Trust J&K. Digitized by eGangotri

वबंधुश्च सखात्वमेव। त्वमेव विद्या
द्रविणं त्वमेव त्वमेव सर्वं मम देव दे
व॥२८॥ दुर्योधन उवाच॥ वासुदेव ज
राकष्टं कष्टं निर्द्धनजीवनं पुत्रशोकं
महाकष्टं कष्टात्कष्टतरं क्षुधा।२९।
त्रैलोक्यचैतन्यमयादिदेव श्रीना
थविष्णो भवदाज्ञयैव॥ प्रातस्समुत्था
यतवप्रियार्थं संसारयात्रामनुवर्त्त

© Dharmartha Trust J&K. Digitized by eGangotri

यिष्ये ॥३१॥ जानामि धर्मं न च मे प्रवृत्ति १८।

र्जानाम्यपापं न च मे निवृत्तिः केनापि दे

वेन हृदिस्थितेन यथा नियुक्तोस्मि तथा

करोमि ॥३२॥ यंत्रस्य गुणदोषेण यं

त्रिणा मधुसूदन । अहं यंत्रं भगवान्

यंत्री मम दोषो न दीयते ॥३३॥ द्विपद

8 वाच ॥ यज्ञेशाच्युत गोविंद माधवानं

त केशव ॥ कृष्ण विष्णो हृषीकेशा वा

सुदेव नमोस्तु ते ॥३४॥ पजयद्वयंवा

© Dharmartha Trust J&K. Digitized by eGangotri

च॥ नमः कृष्णाय शुद्धाय ब्रह्मणेऽनंतमू
र्तये॥ योगेश्वराय योगाय त्वामहं शर
णं गतः।३५। विकर्णउवाच। कृष्णाय वा
सुदेवाय देवकीनंदनाय च॥ नंदगोप
कुमाराय गोविंदाय नमो नमः।३६। सो
मदत्तउवाच। नमः परमकल्याण नम
स्ते विश्वभावन। वासुदेवाय शांताय य
दूनां पतये नमः।३७। विराटउवाच। न
मो ब्रह्मण्यदेवाय गोब्राह्मणहिताय

© Dharmartha Trust J&K. Digitized by eGangotri

च॥ जगद्धिताय कृष्णाय गोविंदाय न १८
मो नमः॥ ३८॥ यम उवाच॥ अतसीपु
ष्पसंकाशं पीतवाससमच्युतं। येन
मस्यंति गोविंदं न तेषां विद्यते भयं
॥ ३९॥ बलिरुवाच॥ कृष्ण कृष्ण
कृपालो त्वमगतीनां गतिर्भव॥ सं
9 सारार्णवमग्नानां प्रसीद पुरुषोत्त
म॥ ४०॥ कृष्ण उवाच॥ स संब्रवी

© Dharmartha Trust J&K. Digitized by eGangotri

मिमनुज्ञासयमूर्द्धिबाहूपोमांमुकुं
दनरक्षितंह्यजनाद्दनेति।।जीवेजप
लनुद्दिनंमररलोद्दलेवापापाघाणका
ष्टमहशायहहसाम्पभीहं।।४।।कष्ट
कसेतिकस्मेतिपोमांस्मरतितिन्न
सराःजलंभीत्वायथापशंनरका
दुद्धराम्पहं।।४४।।ईश्वरउवाच।।
सकृन्नारायणेत्युक्त्वापुमान्कल्पश

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र यो गंगादि सर्व तीर्थेषु स्नातो भ
वति पुत्रक ॥४३॥ अंतकाले स्मरन्वि १०१
ष्णुं प्रयाति परमं पदं । येन पादोदकं
विष्णोर्भक्त्या मूर्ध्नि कृतं मया ॥४४॥ पा
10 र्वत्युवाच ॥ तत्रैव गंगा यमुना च वे
णी गोदावरी सिंधु सरस्वती च । सर्वा
णि तीर्थानि वसंति तत्र यत्राच्युतोदा
रकथाप्रसंगः ॥४५॥ यम उवाच ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नरकेपच्यमानस्ययमेनपरिभावितं ॥
किंत्वयानार्चितोदेवःकेशवःक्लेशना
शनः ॥४६॥ नारदउवाच ॥ जन्मांतरस
हस्रेषुतैर्योध्यानसमाधिभिः । नराणां
क्षीणपापानांकृष्णेभक्तिःप्रजायते ॥४७॥
साधुपृष्टंमहीपालविष्णुभक्तिमतां
त्वया ॥ यस्यस्मरणमात्रेणमहापात
कनरपति ॥४८॥ प्रह्लादउवाच ॥ नाथ

© Dharmartha Trust J&K. Digitized by eGangotri

योनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु
तेष्वचलाभक्तिरच्युतेस्तु सदा त्वयि॥ ११
४८॥ या प्रीतिरविवेकानां विषयेष्वन
पायिनी॥ त्वामनुस्मरतीनिसं हृदया
न्मापसर्पतु ५०॥ विश्वामित्र उवाच॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः कि
मध्वरैः। यो निसं ध्यायते देवं नारा
यणमनन्यधीः ५१॥ जमदग्निरुवाच॥

© Dharmartha Trust J&K. Digitized by eGangotri

नियोस्य वोभवेत्ते षांनिसश्रीनित्यमंगलं।
येषांहृदिस्थोभगवान्मंगलायतनोह
रिः॥५२॥भारद्वाजउवाच॥लाभस्तेषां
जयस्तेषांकुतस्तेषांपराजयः।येषामि
न्दीवरश्यामोहृदयस्थोजनार्दनः॥५३॥
गौतमउवाच॥जोविंदेतिसदास्नानंजो
विंदेतिसदाजपः।जोविंदेतिसदाध्यानं
सदाजोविंदकीर्त्तनं॥५४॥अत्रिरुवाच॥
जौकोटिदानंग्रहणेषुकाशीमकर

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयागेयद्धिकल्पेवासी।यज्ञायतेमेरु
सुवर्णदानंगोविंदनाम्नानसमान १९३।
तुल्यं॥५५॥त्रपाक्षरंपरंब्रह्मगो
विंदेतित्रपाक्षरं॥तस्माहुच्चारि
तंयेनब्रह्मभूयायकल्पते॥५६॥
अच्युतकल्पवृक्षाक्तेअपनंतः
कामदफलं॥चिंतामणिश्चगो
विंदोहरेर्नामविचिंतयेत्॥५७॥

© Dharmartha Trust J&K. Digitized by eGangotri

ति आलोहरवाच॥श्रीमन्नृसिंहवि
भवैगरुडध्वजायतार्क्ष्यपापश प २
मनायभवौषध्यापप॥कृष्मायव
श्चिकजलाग्निभुजंगरोगाः कैरो
व्यपापहरयेगुरुवेनमस्तेपद।
मावितौचउवाच॥कृसत्वहायप
दपंकजेपंजरांतेप्तैवमेवस
तुमानसराजहंसः॥प्राणप्रयाण
समयेकफवाततपित्तैः कंठाविरो

© Dharmartha Trust J&K. Digitized by eGangotri

धनविधौस्मरणां कुतस्ते॥ फलकु
भिलउवाच॥ हरेर्नामैवनामैवमम 1931
जीवनजीवनं॥ कलौनास्सेवना
13 स्सेवगतिरन्यथारन्यथा॥८॥ वसि
ष्ठउवाच॥ कस्सेति मंगलंनामय
स्यवाचिप्रवर्तते॥ भस्मीभवंतितत
त स्याशु महापातककोटयः॥९॥ अ
कंधस्कउवाच॥ कस्सापवासुदेवा
यनहरयेपरमात्मने॥ प्रणतक्ले

© Dharmartha Trust J&K. Digitized by eGangotri

शनारायणगोविंदायनमोनमः॥१२॥
कश्यपउवाच॥ कृष्णानुस्मरणा
देवपापसंघातपंजरं॥ शतधाभे
दमायातिगिरिर्वज्रहतोयथा॥१३॥
भृगुरुवाच॥ नमस्तेतवगोविंदरा
मकृष्णसनातनाधीपदहास्कच्चरणा
न्मुक्तिर्विनाप्यष्टांगयोगतः॥१४॥
लोमशउवाच॥ नमामिनारायणपा
दपंकजंकरोमिनारायणपूजनं

© Dharmartha Trust J&K. Digitized by eGangotri

सहावदामिनारायणानामनिर्मलंस्म
रामिनारायणंतत्वमव्ययं॥८५॥शौन ॥११५॥
कउवाच॥स्मरतेसकलकल्याणं
भाजनंयत्रजायते।पुरुषंतमजंनित्यं
15 व्रजामिशरणंहरिं॥८६॥गार्ग्यउवा
च॥नारायणेतिमंत्रोस्तिवागस्ति
वशवर्त्तिनी॥तथापिनरकेघोरेप
तंतीत्येतदद्भुतं॥८७॥दाल्भ्यउवाच॥
किंतस्यबहुभिर्मंत्रैर्भक्तिर्यस्यज
नार्दने॥नमोनारायणायेतिमंत्रः

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वार्थसाधकः ॥१८॥ वैशंपायन उवा
च ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो
धनुर्द्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रु
वा नीतिर्मतिर्मम ॥१९॥ अर्जुन उवा
च ॥ हरिर्हरति पापानि दुष्टचित्तैरपि
स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्ये
व हि पावकः ॥२०॥ परासर उवाच ॥ स
कृदुच्चरितं येन हरिरित्यक्षरद्वयं ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्र
ति ॥२१॥ पुलस्त्य उवाच ॥ देजियकेरस

© Dharmartha Trust J&K. Digitized by eGangotri

सारज्ञो सर्वशा मधुरत्प्रियो नारायणा
ख्यपीयूषं पिबजिह्वे निरंतरं ॥७२॥ १९५।
हे जिह्वे कटुकस्नेह मधुरं किंन भा
षसे। मधुरं वद कल्याणि लोको
15 हि मधुरप्रियः ॥७३॥ यस्य हस्ते गदा
चक्रं गरुडो यस्य वाहनं। शंखं कर
तले यस्य स मे विष्णुः प्रसीदतु ॥७४॥
वेदव्यास उवाच॥ सत्यं सत्यं पुनः
सत्यमुधृत्यभुजमुच्यते। वेदशा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वात्परं नास्ति न देव केशवात्परं ॥१५॥
अच्युतानंतगोविंदनामोच्चारणभेष
जं ॥ नश्यंति सकलारोगाः सत्यंसत्यंव
दाम्यहं ॥१६॥ मार्कंडेय उवाच ॥ सा हा
निस्तन्महच्छिद्रं सा चांधजडमूकता ॥
यन्मुहूर्तं क्षणं वापि वासुदेवं न चिंत
येत् ॥१७॥ अगस्त्य उवाच ॥ निमिषं निमि
षार्धं वा प्राणिनां विष्णुचिंतनं ॥ तत्र त
त्र कुरुक्षेत्रं प्रयागं नैमिषं वनं ॥१८॥

© Dharmartha Trust J&K. Digitized by eGangotri

वामदेव उवाच ॥ मनसा कर्मणा वाचा
ये स्मरंति जनार्दनं ॥ कल्पकोटिसहस्रा १६
णि ध्यानमेकं विशिष्यते ॥१७॥ शुक उ
वाच ॥ आलोड्य सर्वशास्त्राणि विचा
16 र्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्नं
ध्येयो नारायणः सदा ॥१८॥ सनक उ
वाच ॥ शरीरं च नवछिद्रं व्याधिग्रस्तं क
लेवरं ॥ औषधं जाह्नवीतोयं वैद्यो नारा
यणो हरिः ॥१९॥ भोजनाछादने चिंता

© Dharmartha Trust J&K. Digitized by eGangotri

वृथा कुर्वंति वै स्मवाः ॥ योसौ विश्वंभ
रो देवः कथं भक्तानुपेक्षते ॥८२॥ वा
सनावासु देवाय वासितं भुवनत्रयं स
र्वभूतनिवासिनो वासु देव नमोस्तुते
॥८३॥ अपराध सहस्राणि क्रियते ह
र्निशं मया ॥ दासो हमिति मे मत्वाक्ष
मस्व परमेश्वर ॥८४॥ यः पठेत्प्रा
तरुत्थाय वै स्मव स्तोत्र मुत्तमं ॥ सर्व
पापविनिर्मुक्तो विष्णु लोक सगच्छे

© Dharmartha Trust J&K. Digitized by eGangotri

ति ॥८-५॥ इति श्री पांडवी गीता संपू

र्णं समाप्ता शुभमस्तु शिवार्पणं ॥१७॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि

तं मया ॥ यदि शुद्धमशुद्धं वा मम दो

षो न दीयते ॥ विश्वेश्वर प्रीतोस्तु ॥

आपुसाक स्वामि ब्रह्मानंदनु छे पत्रे २०

बह ... न जानाती मम मायावामोहीतीस

... दीजनकवी वरामोमहीतालो १

17

© Dharmartha Trust J&K. Digitized by eGangotri